# I Semester B.H.M./B.C.A. Examination, November/December 2016
## (Freshers and Repeaters) (CBCS)
## (2014-15 and Onwards)
## LANGUAGE SANSKRIT – I
## Meghadutam, Grammar and Comprehension

Time : 3 Hours Max. Marks : 70

***Instructions*** : *1) Answer in **Sanskrit/Kannada/English**.*
*2) Question No. **I, V** and **VI** should be answered in **Sanskrit** only.*

I. समीचीनम् उत्तरं चिनुत । (10×1=10)

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select the correct answer.

1) मेघदूतं किं प्रकारकं काव्यम् ?

अ) महाकाव्यम् आ) लघुकाव्यम् इ) गद्यकाव्यम् ई) चम्पूकाव्यम्

2) कालिदासस्य जन्मभूमिः का इति कथ्यते ?

अ) काशी आ) अलका इ) उज्जयिनी ई) अयोध्या

3) कालिदासः कस्मिन् अलङ्कारप्रयोगे प्रसिद्धः ?

अ) रूपकः आ) उपमा इ) श्लेषः ई) उत्प्रेक्षा

4) कुबेरस्य सेवकः कः ?

अ) यक्षः आ) यमः इ) अग्निः ई) वायुः

5) वत्सराजः कः ?

अ) विक्रमः आ) उदयनः इ) अग्निमित्रः ई) पुरूरवः

6) खे मेघं के सेविष्यन्ते ?

अ) चातकाः आ) काकाः इ) बलाकाः ई) पिकाः

7) अवन्तीराजपुत्री का ?

अ) महाश्वेता आ) विनता इ) वसुधा ई) वासवदत्ता

8) शप्तः यक्षः कुत्र वसतिं चक्रे ?

अ) रमणाश्रमेषु आ) रामगिर्याश्रमेषु इ) कण्वाश्रमेषु ई) बदरिकाश्रमेषु

P.T.O.

9) रिक्त: सर्व: किं भवति ?

अ) गुरु आ) लघु इ) उष्णं ई) शीतं

10) शरवणभव: क: ?

अ) स्कन्द: आ) विनायक: इ) इन्द्र: ई) वायु:

II. द्वयो: प्रश्नयो: उत्तरं लिखत । **(2×10=20)**

ಯಾವುದಾದರೂ **ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರವನ್ನು ಬರೆಯಿರಿ.

Answer **any two** of the following :

1) यक्षेन निर्दिष्टम् अलकापर्यन्तं मार्गं विवृणुत ।

ಅಲಕಾನಗರಿಯವರೆಗೆ ಯಕ್ಷನಿಂದ ನಿರ್ದೇಶಿಸಿದ ಮಾರ್ಗವನ್ನು ವಿವರಿಸಿ.

Describe the path upto Alaka as directed by Yaksha.

2) कालिदासस्य जीवन,देश,काल,कृती: अधिकृत्य प्रबन्धं लिखत ।

ಕಾಳಿದಾಸನ ಜೀವನ, ದೇಶ, ಕಾಲ ಕೃತಿಗಳನ್ನು ಆಧರಿಸಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on the life, date and works of Kalidasa.

3) मेघदूते विद्यमानानां पर्वतानां वर्णन कुरूत ।

ಮೇಘದೂತದಲ್ಲಿ ಬರುವ ಪರ್ವತಗಳನ್ನು ವರ್ಣಿಸಿರಿ.

Describe the mountains mentioned in Meghadutam.

III. त्रयाणां श्लोकानाम् अनुवादं कृत्वा भावं विवृणुत । **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any three** of the following.

1) धूमज्योति: सलिलमरूतां संनिपात: क्व मेघ:
सन्देशार्था: क्व पटुकरणै: प्राणिभि: प्रापणीया: ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।

2) सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियाया:
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिका धौतहर्म्या ।।

3) त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारूह्य मालं
किञ्चित्पशचाद् व्रज लघुगतिर्भूय एवोत्तरेण ।।

4) प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ।।

5) अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीयां
आमन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ।।

IV. द्वयोः ससन्दर्भं विवृणुत । **(2×4=8)**

ಯಾವುದಾದರೂ ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Annotate **any two** of the following.

1) वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।

2) प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।

3) कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ।

4) यात्र्या मोघा वरमधिगुणे नाधमेलब्धकामः ।

V. संस्कृतभाषया उत्तराणि लिखत ।
ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ.
Answer in **Sanskrit.**

a) **पञ्चानां** लिङ्गविभक्तिवचनानि लिखत । **(5×1=5)**

1) शम्भो:
2) तस्या:
3) अनिल:
4) मेघ:
5) भवन्तम्
6) चामरै:
7) लक्ष्मीम्
8) वायुम्

b) **पञ्चानां** लकारपुरुषवचनानि लिखत । **(5×1=5)**

1) गच्छ
2) पश्यामि
3) अस्ति
4) दृश्यते
5) अकरोत्
6) ययाचे
7) सेविस्यन्ते
8) अभवम्

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(5×2=10)**

क्रिकेट्, टेनिस्, केरं, ब्याड्मिण्टन्, बाक्सिंग्, पोलो, गाल्फ् , इत्यादिका: बहु संख्याका: वैदेशिका: क्रीडा: अद्य भारतेऽपि क्रीड्यन्ते । ओलिम्पिक्, एषियाड् इत्यादि प्रतियोगितासु वैदेशिक क्रीडानामेव प्रामुख्यमस्तीति प्रशासनानि जनता च वैदेशिकक्रीडानां प्रोत्साहम् अधिकं कुर्वन्ति । तेषां मध्ये 'एकादशमूर्खै: क्रीड्यमाना लक्षाधिकमूर्खै: दृश्यमाना' इति विनोदार्थं कुप्रसिद्धा क्रिकेट् क्रीडा क्रीडार्थं रक्षितस्य धनस्य बहुभागं कवलयति । अनेन इतरा: क्रीडा: पश्चात् पतन्ति उपेक्षिता: तिष्ठन्ति च । क्रिकेट् समये कार्यालयेषु विद्यालयेषु च अत्यल्पं कार्यं सम्पद्यते । अधिकानां मानव होराणाम् अपव्यय: भवतीति केषुचित् अभिवृद्धेषु देशेषु क्रिकेट् क्रीडा न क्रीड्यते इति तु सन्तोषस्य स्थानम् । अद्यत्वे विज्ञानस्य कारणात् प्रादुर्भूता: नूतना: क्रीडा: अपि सन्ति ।

**प्रश्ना :**

1) विदेशीया क्रीडा: का: ?
2) कुत्र वैदेशिकक्रीडानां प्रामुख्यं वर्तते ?
3) क्रिकेट् कथं कुप्रसिद्धा ?
4) क्रिकेट् किं कवलयति ?
5) सन्तोषस्य स्थानं किम् ?